ञिट् दुधुक्षे । णिचि धुक्षयति ते "निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन" "करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशाङ्करेखा" कुमा० "सत्वं समदुधुक्षच्च" भट्टिः ।

**धुङ्क्ष** पु० धुक्ष–अच् पृषो० । पक्षिभेदे अजादेराकृतिगणत्वात् स्त्रियां टाप् । "दिशां कङ्को धुङ्क्षाग्नेयी" यजु०२४।३१

**धुत** त्रि० धु–क्त । १त्यक्ते २विधूते च मेदि० ।

**धुन** त्रि० धूनयति धूनि अच् पृषो० । कम्पके । "धुनेतयः सुप्रकेतम्" ऋ० ४।५०।२

**धुनि(नी)** स्त्री धुनोति वेतसादीन् धु-निक् धूनयति वेतसान् धूनि–इन् पृषो० ह्रस्वो वा ङीप् वा । १नदीमात्रे अमरः । "दिवे दिवे धुनयो यन्त्यर्थम्" ऋ०२।३०।२ "धुनयो नद्यः" भा० । "स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि" भाग० ८।२१।६ २असुरभेदे पु० "स्वप्नेनाभ्युप्य चुमुरिं धुनिञ्च" २।१५।९ । "चुमुरिं धुनिम् एतन्नामासुरौ" भा० ३कम्पके त्रि० ४जलप्रतिरोधके असुरभेदे पु० "त्वं धुनिरिन्द्र ! धुनिमतीः" ऋ०१।१७५।९ "हे इन्द्र ! त्वं धुनिः कम्पयिता शत्रूणामसि अतो धुनिमतीः कम्पनोपेततरङ्गवतीः । अथ वा धुनिर्नाम जलप्रतिरोधकार्यसुरः स एव प्रतिरोधकतयास्ति यासां तादृशीरपः" भा० तरङ्गस्य कम्पनवत्त्वात् धुनित्वम् । धूनयति धू-णिच्–नुक् इन् पृषो० ह्रस्वः । सप्तानां मरुतां मध्ये ५मरुद्भेदे । ते च मरुतः "उग्रश्च१ भीमश्च२ ध्वान्तश्च३ धुनिश्च४ । सासह्वांश्च५ाभियुग्वा६ च विक्षिपः७ स्वाहा" यजु० ३९।७ उक्ताः ।

**धुनीनाथ** ६त० समुद्रे राजनि० । धुनीपत्यादयोऽप्यत्र ।

**धुन्धु** पु० मधुराक्षसस्यापत्ये "उतङ्क उवाच । भवता रक्षणं कार्य्यं तत्तावत् कर्त्तुमर्हसि । निरुद्विग्नस्तपश्चर्त्तुं न हि शक्नोमि पार्थिव ! । ममाश्रमसमीपे वै समेषु मरुधन्वसु । समुद्रो वालुकापूर्ण उज्जानक इति श्रुतः । देवतानामवध्यश्च महाकायो महाबलः । अन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान् । राक्षसस्य मधोः पुत्रो धुन्धुर्नाम महासुरः । शेते लोकविनाशाय तप आस्थाय दारुणम् । संवत्सरस्य पर्य्यन्ते स निश्वासं विमुञ्चति । यदा तदा भूश्चलति सशैलवनकानना । तस्य निश्वासवातेन रज उद्धूयते महत् । आदित्यपथमावृत्य सप्ताहं भूमिकम्पनम् । सविस्फुलिङ्गं साङ्गारं सधूममतिदारुणम् । तेन तात ! न शक्नोमि तस्मिन् स्थातुं स्व आश्रमे । तं मारय महाकायं लोकानां हितकाम्यया । लोकाः सुस्था भवन्त्वद्य तस्मिन् विनिहते त्वया । त्वं हि तस्य वधायैकः समर्थः पृथिवीपते ! । विष्णुना च वरो दत्तो मह्यं पूर्वयुगेऽनघ ! । यस्तं महासुरं रौद्रं हनिष्यति महाबलम् । तस्य त्वं वरदानेन तेज आप्याययिष्यसि । न हि धुन्धुर्महातेजास्तेजसाऽल्पेन शक्यते । निर्दग्धुं पृथिवीपाल ! दिव्यवर्षशतैरपि । वीर्य्यं हि सुमहत्तस्य देवैरपि सुरासदम् । स एवमुक्तो राजर्षिरुतङ्केन महात्मना । कुवलाश्वं सुतं प्रादात्तस्मिन् धुन्धुविवर्हणे" हरिवं० ११अ० ।

**धुन्धुमार** पु० धुन्धुं मारयति मारि–अण् उप०स० । राजभेदे "राजा हि वीर्य्यवांस्तात ! इक्ष्वाकुरपराजितः । बृहदश्व इति ख्यातो भविष्यति महीपतिः । तस्य पुत्रः शुचिर्दान्तः कुवलाश्व इति श्रुतः । स योगबलमास्थाय मामकम् पार्थिवोत्तमः । शासनात्तव विप्रर्षे ! धुन्धुमारो भविष्यति" भा०व०२००अ० ।

"बृहदश्व उवाच । भगवन् ! न्यस्तशस्त्रोऽहमयन्तु तनयो मम । भविष्यति द्विजश्रेष्ठ ! धुन्धुमारो न संशयः । स तं व्यादिश्य तनयं राजर्षिर्धुन्धुमारणे । जगाम पर्वतायैव तपसे संशितव्रतः । कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिवः । प्रायादुतङ्कसहितो धुन्धोस्तस्य निवर्हणे । तमाविशत्तदा विष्णुस्तेजसा भगवान् प्रभुः । उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया । तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत् । एष श्रीमानवध्योऽद्य धुन्धुमारो भविष्यति । दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन् । देवदुन्दुभयश्चैव प्रणेदुर्भरतर्षभ ! । स गत्वा जयतां श्रेष्ठस्तनयैः सह वीर्य्यवान् । समुद्रं खानयामास वालुकापूर्णमव्ययम् । नारायणेन कौरव्य ! तेजसाऽप्यायितस्तदा । स बभूव महातेजा भूयो बलसमन्वितः । तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा । धुन्धुरासादितो राजन् ! दिशमावृत्य पश्चिमाम् । मुखजेनाग्निना क्रोधाल्लोकानुद्वर्त्तयन्निव । वारि सुस्राव वेगेन महोदधिरिवोदये । सोमस्य, भरतश्रेष्ठ ! धारोर्मिकलिलं महत् । तस्य पुत्रशतं दग्धं त्रिभिरूनन्तु रक्षसा । ततः स राजा कौरव्य ! राक्षसं तं महाबलम् । आससाद महातेजा धुन्धुं धुन्धुनिवर्हणः । तस्य वारिमयं वेगमपिबत् स नराधिपः । योगी योगेन वह्निं स शमयामास वारिणा । निहत्य तं महा-